अपराधः। श्रुतिस्मृतिविरुद्धाचारः। यथा,—
"अधर्म्मेणैधते राजन् ततो भद्राणि पश्यति।
ततः सपत्नान् जयति समूलस्तु विनश्यति ॥"
इति महाभारतम्।
("अधर्म्ममिदमत्यन्तं कथं भीष्मोऽनुमन्यते"।
इति महाभारतं ॥)

अधर्म्मी, [न्] त्रि, (अधर्म्मः पापं विद्यतेऽस्य।) अधार्म्मिकः। अधर्म्मात्मा। अधर्म्मशब्दादस्त्यर्थे इन् ॥

अधश्चरः, पुं, (अधश्चरति इति अधस् + चर + अच्।) चौरः। इति हारावली ॥ अधोगामिनि त्रि ॥

अधश्चौरः, पुं, (अधः चौरः अधस् + चुर + अच् + स्वार्थे अण्) नीचचौरः। सिंदालचोर इति भाषा। इति केचित् ॥

अधस्तात् व्य, (अधर + अस्ताति।) अधोभागः। इति हलायुधः ॥ (तस्याधस्तात् वयमपि रतास्तेषु पर्य्यटनेषु। इति उत्तरचरितं।) (तथा "निमज्जतोऽधस्तादज्ञौ दाटप्रतीच्छकौ" ॥ इति मनुः।) पश्चाद्भागः। इत्यमरटीका ॥ रतिगृहं। भगं। इति त्रिकाण्डशेषः ॥

अधामार्गवः, पुं, (न धीयतेऽसौ अधाः न + धा + क्विप्। तादृशं मार्गं वाति गच्छति। अधा + मार्ग + वा + कः।) (अपामार्गः। इति क्षीरस्वामी।) धामार्गववृक्षः। इत्यमरटीकायां रायमुकुटः ॥

अधार्म्मिकः, त्रि, (धर्म्मं चरति। धर्म्म + ठक्। न धार्म्मिकः।) अधर्म्मी। अधर्म्मात्मा। पापी। तत्पर्य्यायः। आधार्म्मिकः २। इति त्रिकाण्डशेषः ॥ यथा,—
"यस्तु पञ्च महायज्ञविहीनः स निराकृतः।
अधार्म्मिकः स्यादृषलः अवकीर्णी हतव्रती" ॥
इति जटाधरः ॥ अतो नाधार्म्मिके वसेद्ग्रामे। इति कुल्लूकभट्टश्च ॥

अधि व्य, (न धीयते धार्य्यते। नञ् + धा + कि।) प्रादिविंशत्युपसर्गमध्ये उपसर्गविशेषः। अस्यार्थः। उपरिभागः। इति दुर्गादासः ॥ अधिकारः। ईश्वरः। इति मेदिनी ॥ अधिकं। यथा अधिमासः अधिको मासः इत्यर्थः। इति स्मृतिः ॥

अधिः, पुं, आधिः। मनःपीड़ा। इत्यमरटीकायां भरतः ॥

अधिकं, क्ली, (अधि + स्वार्थे कन्।) काव्यालङ्कारभेदः। तस्य लक्षणं। अधिकं पृथुलाधारादाधेयाधिक्यवर्णनं। उदाहरणं यथा। ब्रह्माण्डानि जले यत्र तत्र मान्ति न ते गुणाः ॥ इति कुवलयानन्दे अप्पयदीक्षितः ॥

अधिकः, त्रि, (अध्यारूढ़ एव अधि + स्वार्थे कन्।) अतिरिक्तः। अनेकः। इति हेमचन्द्रः। (पुमान् पुंसोऽधिके शुक्रे। स्त्री भवत्यधिके स्त्रियाः। इति मनुः।)

अधिकरणं, क्ली, (अधि + कृ + अधिकरणे ल्युट्।) एकन्यायोपपादनं। इति हेमचन्द्रः ॥ अधिक्रियते अत्र। विषयादिपञ्चावयवविवेचनोपेतग्रन्थः। यथा,—
"विषयो विशयश्चैव पूर्ब्बपक्षस्तथोत्तरं।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतं" ॥
विषयो विचारार्हवाक्यं। विशयोऽस्यायमर्थो न वेति संशयः। पूर्ब्बपक्षः प्रकृतार्थविरोधितर्कोपन्यासः। उत्तरं सिद्धान्तानुकूलतर्कोपन्यासः। निर्णयो महावाक्यार्थतात्पर्य्यनिश्चयः। एवं क्रमेण विवेचनमत्राधिक्रियते इत्यधिकरणं। इति तिथ्यादितत्त्वं ॥ अधिक्रियतेऽर्थोविचारोऽस्मिन्ननेनेति वा अधिकरणं वेदविचारग्रन्थात्मिका मीमांसा। सा च द्विधा कर्म्ममीमांसा ब्रह्ममीमांसा चेति। कर्म्मकाण्डवेदविचारग्रन्थः कर्म्ममीमांसा जैमिनिप्रणीता सैव मीमांसात्वेन प्रसिद्धा पूर्ब्बमीमांसा इत्युच्यते। ब्रह्मकाण्डवेदविचारग्रन्थश्च ब्रह्ममीमांसा वेदव्यासप्रणीता सा च वेदान्तत्वेन प्रसिद्धा उत्तरमीमांसा इत्युच्यते। इत्यत्र मीमांसापदमपि करणाधिकरणव्युत्पत्त्या ग्रन्थपरं ज्ञेयं। भावव्युत्पत्त्या तु विचारपूर्ब्बकनिर्णयपरमिति। यत्तु अधिक्रियते विचारोऽस्मै इति व्युत्पत्त्या अधिकरणं मीमांसासिद्धान्त इत्युदीच्येनाभिहितं तन्न। सिद्धान्तस्याधिकरणचरमावयवत्वेनाधिकरणाङ्गत्वात् अधिकरणत्वानुपपत्तेः। यथा न्यायमते निगमनस्य न्यायावयवत्वं न तन्मात्रस्य न्यायत्वं तथेहापीति सुधीभिर्भाव्यं। तस्य चाधिकरणस्य पञ्चाङ्गानि। तदुक्तं,—
"विषयोऽविषयश्चैव पूर्ब्बपक्षस्तथोत्तरं।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतं" ॥
विषयो विचारार्हवाक्यं। यथा। खादिरे पशुं बध्नाति खादिरं वीर्य्यकामस्य यूपं कुर्व्वीत इत्यादि संयोगपृथक्त्वाधिकरणादेः। एवं विषयो निश्चयस्तद्भिन्नस्तद्विरोधी वा अविषयः संशयः। तदुक्तं,—
"विशब्दस्तु विशेषार्थः सिनोतिर्बन्धनार्थकः।
विशेषेण सिनोतीति विषयोऽर्थनियामकः" ॥
नियामकः कोटिनिश्चायकतया विशेषदर्शनात्मकव्याप्यवत्त्वादिनिश्चय एव। एवमेव न्यायगुरुन्यायवागीशभट्टाचार्य्यचरणाः ॥ अन्ये तु विशय इति विपूर्ब्बस्य शेतेः संशयार्थकत्वमालोच्य तालव्यमध्यपाठं वदन्तः विशयः संशयः इति व्याचक्षते तत्र विपूर्ब्बशेतेः संशयार्थकत्वे मानमनुसन्धेयं। संशयः अस्यायमर्थो न वेत्याकारकः। पूर्ब्बपक्षः सिद्धान्तविरुद्धतर्कोपन्यासेन सिद्धान्तविरुद्धसंशयैककोटिव्यवस्थापनं। उत्तरं प्रकृतसिद्धान्तानुकूलतर्कोपन्यासेन प्रकृतसिद्धान्तसिद्धसंशयापरकोटिव्यवस्थापनं। निर्णयः सिद्धान्तसिद्धविचार्य्यवाक्यतात्पर्य्यावधारणं। कर्म्ममीमांसाधिकरणानि सहस्रसंख्यकानि जैमिनिप्रणीतानि शास्त्रदीपिकादौ पार्थसारथिमिश्रादिभिर्व्वधा विवृतानि। इति चन्द्रशेखरकृततत्त्वसम्बोधिनी ॥*॥ व्याकरणमते आधाररूपकारकं। तच्चतुर्व्विधं। सामीप्यं १ यथा गङ्गायां घोषः। कालिन्द्यां रेमे ॥ आश्लेषः २ यथा दिवि देवाः। कानने रेमे ॥ विषयः ३ यथा शास्त्रे निपुणः। केलौ कुशलः ॥ व्याप्तिः ४ यथा तिलेषु तैलं। सकले स्थितः ॥ * ॥

अधिकर्द्धिः, त्रि, (अधिका ऋद्धिः सम्पत्तिर्यस्य सः।) अतिशयसम्पत्तियुक्तः। तत्पर्य्यायः। समृद्धः २। इत्यमरः ॥

अधिकर्म्मिकः, पुं, (अधिकृत्य हट्टं कर्म्मणि प्रभवति अधिकर्म्मन् + ठन् तस्य इक) हट्टाध्यक्षः। इति हेमचन्द्रः ॥ हाटेर दारोगा इति भाषा।

अधिकाङ्गं, क्ली, (अङ्गादधिकं मयूरव्यंसकादित्वात् समासः।) सकञ्चुकाः मध्ये यद्बध्नन्ति तत्। कञ्चुकादिदार्ढ्यार्थं शूरैर्मध्यकाये निबध्यपट्टिकादि। तत्पर्य्यायः। सारसनं २। इत्यमरः ॥ विंशत्यङ्गुल्याद्यतिरिक्ताङ्गविशिष्टे त्रि॥ (यथा मनुः।—
"नोद्वहेत् कपिलां कन्यां
नाधिकाङ्गीं न रोगिणीं" ॥)

अधिकारः, पुं, (अधि + कृ + घञ्।) राजादीनां चामरधूननच्छत्रधारणादिव्यापारः। तत्पर्य्यायः। प्रक्रिया २। इत्यमरः ॥ प्रकरणं। यथा नैमित्तिकोऽयं प्रायश्चित्ताधिकार इति मिताक्षरा ॥ स्वामित्वं। यथा "सर्व्वे स्युरधिकारिणः" इति स्मृतिः ॥ अधिकृतदेशादिः। यथा निजाधिकारः भिन्नाधिकारः इत्यादि बहवः शिष्टप्रयोगाः ॥ (यथा मनुः।—
"तस्य शास्त्रेऽधिकारोऽस्मिन्
ज्ञेयो नान्यस्य कस्यचित्" ॥)

अधिकारी, [न्] त्रि, (अधिकरोति अधि + कृ + नन्द्यादित्वात् णिनि।) प्रभुः। स्वामी। अधिपतिः। अधिकारविशिष्टः। स्वत्ववान्। इति स्मृतिः ॥ यथा,—
"इष्टापूर्त्तं द्विजातीनां धर्म्मः सामान्य उच्यते।
अधिकारी भवेत् शूद्रः पूर्त्ते धर्म्मे न वैदिके" ॥
इति मलमासतत्त्वं ॥ अपिच।
"स्नातोऽधिकारी भवति दैवे पैत्रे च कर्म्मणि"।
इत्याह्निकाचारतत्त्वं ॥ वेदान्तमते विधिवदधीतवेदाङ्गत्वेन आपाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्ज्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्म्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता। इति वेदान्तसारः ॥ * ॥ धनाधिकारिणो दायभागशब्दे द्रष्टव्याः ॥ * ॥ श्रीमूर्त्यादीनां वेशकर्त्ता। इति लोकप्रसिद्धं ॥

अधिकारी, [न्] पुं, (अधिकरोति अधि + कृ + नन्द्यादित्वात् णिनि।) वेदान्तशास्त्रवेत्ता। अधिगताखिलवेदार्थनितान्तनिर्म्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता। इति वेदान्तसारः ॥ पुरुषः। इति राजनिर्घण्टः ॥

अधिकृतः, पुं, (अधि + कृ + क्तः।) अध्यक्षः। आयव्ययपरीक्षकः ॥ इत्यमरः ॥ (आचार इत्यधिकृतेन मया गृहीता या वेत्रयष्टिरवरोधगृहेषु राज्ञः। इति शाकुन्तले।) कृताधिकारद्रव्ये वाच्यलिङ्गः।

अधिक्रमः, पुं, (अधि + क्रम् + घञ् वृद्ध्यभावः।) आक्रमणं। इति हेमचन्द्रः ॥